[1]अपचितः- [A]अपचायितः-तम् , चायितः, चिचायिषितः, चेकीयितः-तवान् ;

चायः, चायः, चिचायिषुः, [2]चेचयः ;

चायितव्यम् , चाययितव्यम् , चिचायिषितव्यम् , चेकीयितव्यम् ;

चायनीयम् , चायनीयम् , चिचायिषणीयम् , चेकीयनीयम् ;

[B]चाय्यम् , चाय्यम् , चिचायिष्यम् , चेकीय्यम् ;

ईषच्चायः-दुश्चायः-सुचायः ; — —

चाय्यमानः, चाय्यमानः, चिचायिष्यमाणः, चेकीय्यमानः ;

चायः, चायः, चिचायिषः, चेकीयः ;

चायितुम् , चाययितुम् , चिचायिषितुम् , चेकीयितुम् ;

[3]अपचितिः, चायना, चिचायिषा, चेकीया ;

चायनम् , चायनम् , चिचायिषणम् , चेकीयनम् ;

चायित्वा , चाययित्वा, चियायिषित्वा, चेकीयित्वा ;

निचाय्य, प्रचाय्य, प्रचिचायिष्य, प्रचेकीय्य ;

चायम् २, } चायम् २, } चिचायिषम् २, } चेकीयम् २ ; }
चायित्वा २, } चाययित्वा २, } चिचायिषित्वा २, } चेकीयित्वा २. }

---

1. 'अपचितश्च' (7-2-30) इति निष्ठायां, प्रकृतेश्चिभावः, प्रत्ययस्य इडभावश्च वा निपात्यते। पक्षे अपचायितः इत्यपि भवति। बालमनोरमायां तु चिञो ण्यन्तस्य 'अपचितः' इति निपातनम्—इत्युक्तम्। भाष्ये तु चायतेरेव निपातनं कृतं दृश्यते।

2. यङो लुकि, 'एरनेकाचः—' (6-4-82) इति यणि रूपमेवम्।

3. 'क्तिनि नित्यं चिभावो वक्तव्यः' (वा. 7-2-30) इति वचनात्, 'गुरोश्च हलः (3-3-103) इत्यस्यापवादः क्तिनि चिभावः।

A. 'भयसंहृष्टरोमाणस्ततस्तेऽपचितद्विषः [त्विषः]।
क्षणेन क्षीणविक्रान्ताः कपिनाऽनेषत क्षयम् ॥' भ. का. 9-22.

B. चाय्या व्ययद्दाशविलोकमेषभ्रेषज्झषा यासदघं स्पशन्ती ॥' धा. का. 2-27.